## तत्र जातः । (२५/१३९३)

अणादयो घादयश्च[1] प्रत्ययाः प्रकृताः, तेषामतः प्रभृति अर्थाः समर्थविभक्तयः च निर्दिश्यन्ते । तत्र इति सप्तमीसमर्थात् जातः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । स्रुघ्ने जातः स्रौघ्नः । [2]माथुरः (४.१.८३/१०७३) । औत्सः । औदपानः (४.१.८६/१०७८) । [3]राष्ट्रियः । अवारपारीणः (४.२.९३/१३१३) । शाकलिकः । माकलिकः (४. २. ११७/१३४१) । [4]ग्राम्यः । [5]ग्रामीणः (४. २.९४/१३१४) । कात्रेयकः । औम्भेयकः (४. २. ९५/१३१५) ॥

## प्रावृषष्ठप् । (२६/१३९४)

प्रावृट्शब्दात् सप्तमीसमर्थाज् जातः इत्येतस्मिन्नर्थे ठप् प्रत्ययो भवति । एण्यस्य (४.३. १७/१३८८) अपवादः । पकारः स्वरार्थः । प्रावृषि जातः प्रावृषिकः ॥

## सञ्ज्ञायां शरदो वुञ् । (२७/१३९५)

शरच्छब्दात् सप्तमीसमर्थाज् जातः इत्येतस्मिन्नर्थे वुञ् प्रत्ययो भवति ऋत्वणः (४.३.१६/१३८७) अपवादः, समुदायेन चेत् सञ्ज्ञा गम्यते । शारदका दर्भाः । शारदका मुद्गाः । दर्भविशेषस्य [6]मुद्गविशेषस्य चेयं सञ्ज्ञा । सञ्ज्ञायाम् इति किम् ? शारदं सस्यम् । सञ्ज्ञाधिकारं केचित् 'कृतलब्धक्रीतकुशलाः' (४. ३. ३८/१४१३) इति यावदनुवर्तयन्ति ॥

## पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन् । (२८/१४०१)

पूर्वाह्णादिभ्यः शब्देभ्यः वुन् प्रत्ययो भवति[7] 'तत्र जातः' (४. ३. २५/१३९४) [8]इत्येतस्मिन् विषये सञ्ज्ञायां गम्यमानायाम् । [9]पूर्वाह्णकः । अपराह्णकः । 'विभाषा पूर्वाह्णापराह्णाभ्याम्' (४. ३. २४/१३९२) इत्यस्यापवादः । आर्द्रकः । मूलकः । नक्षत्राणः (४. २. ३/१२०४) अपवादः । प्रदोषकः । 'निशाप्रदोषाभ्यां च' (४.३. १४/१३८४) इत्यस्यापवादः । [10]अवस्करकः । औत्सर्गिकस्याणः (४. १. ८३/१०७३) अपवादः । असञ्ज्ञायां तु [11]यथाप्राप्तं ठञादयः एव भवन्ति ॥

## पथः पन्थ च । (२९/१४०२)

[12]पथिशब्दाद् वुन् प्रत्ययो भवति, [13]तत्र जातः इत्येतस्मिन् विषयेऽणोऽपवादः । प्रत्ययसंनियोगेन च पथः पन्थ इत्ययमादेशः भवति । पथि जातः [14]पन्थकः ॥

---

1. च नास्ति क. 2. माधुरः ड. 3. राष्ट्रीयः ह. 4. मान्थविकः ड. ह. 5. नास्ति फ. 6. कस्यचित् इत्यधिकम् क. ड. इ. फ. ह. 7. अणोऽपवादः इत्यधिकम् फ. 8. इत्येतस्मिन् विषये नास्ति फ. 9. पूर्वाह्णकम् अपराह्णकम् फ. 10. अवरकारकः ह. 11. यथाप्राप्ताः ह. 12. पथात् फ, पथःशब्दात् क. 13. सप्तमीसमर्थात् इत्यधिकम् फ. 14. पथकः फ.